# कोऽहं ?

"KOHAM?" (Who am I ?)

**Sri Ramanasramam**
Tiruvannamalai - 606 603.
2008

**Koham ? (Who am I ?)** Published by V. S. Ramanan, President, Sri Ramanasramam, Tiruvannamalai - 606 603. Phone : 04175-237200
email : ashram@sriramanamaharshi.org Website : www.sriramanamaharshi.org

© Sri Ramanasramam
Tiruvannamalai.

**Salutations to Sri Ramana Who resides in the Heart Lotus**

## PREFACE TO THE FIRST EDITION

Many were the devotees who were attracted to the presence of Bhagavan Sri Ramana while he was living in the Virupaksha Cave, situated in the holy region of Arunachala, the Heart Centre of the world, which confers liberation on those who (merely) think of It. They were drawn to him on account of his wonderful state of **tapas** - absorption in the silence of **yoga samadhi,** which is difficult of achievement.

One among these devotees was Sivaprakasam Pillai who approached Maharshi in 1901-02 with devotion, faith and humility and prayed that he may be blessed with instructions on Reality.

The questions raised over a period of time by Sivaprakasam Pillai were answered by the silent Maharshi in writing - in Tamil.

The compilation (of the instruction) in the form of questions and answers has already been translated into Malayalam and many other languages.

May this Sanskrit translation now made, be crowned with success !

## PUBLISHER'S NOTE

The Sanskrit translation of Sri Bhagavan's *Who am I ?* entitled *Koham?* by Jagadiswara Sastry was published earlier in 1945.

We are happy to bring out a second edition. The special feature of this edition is that the text is in Sri Bhagavan's handwriting.

A transliteration of the text into English has also been provided. It follows the standard diacritical notation excepting the use of :

| | | |
|---|---|---|
| **ch** | for | **c** |
| **chh** | for | **ch** |
| **jn** | for | **ñ** |
| **sh** | for | **ṣ** |

**hṛdaya kamala vāsine śrīmate ramaṇāya namaḥ**

# āmukham

bhūmanḍala hṛdayātmake smaraṇānmuktide' sminnaruṇā-chala divya kshetre virūpākshaguhāyām bhagavataḥ śrī ramaṇasyātyadbhuta kaṭhina mauna tapassamādhiyogena svanikaṭamākṛshṭeshu bahushu janeshvanyatamena śivaprakāśam piḷḷai nāmakena kenachidbhaktena 1901-1902 kristuśakābde maharshīnabhigamya mama tatvopadeśenā-nugrahaḥ kartavya iti bhakti śraddhā vinayādi purassaram prā-rthanām kṛtvā paripṛshṭānām praśnānām, tadā tadā mauninā maharshiṇā drāviḍa bhāshāyām likhitvādattamuttaramidam praśnottarākāram keraḷādi nānā deśabhāshānūditamapīdānīm gīrvāṇa vāṇyāmanūdyamānam vijayatetamām

|| śubham ||

॥ हृदयकमलवासिने श्रीमते रमणाय नमः ॥

# आमुखं

भूमण्डलहृदयात्मके स्मरणान्मुक्तिदेऽस्मिन्नरुणाचल दिव्य क्षेत्रे विरूपाक्ष गुहायां भगवतः श्रीरमणस्यात्यद्भुत कठिन मौन तपस्समाधियोगेन स्वनिकटमाकृष्टेषु बहुषु जनेष्वन्यतमेन शिवप्रकाशं पिळ्ळै नामकेन केनचिद्भक्तेन १९०१-१९०२ क्रिस्तु शकाब्दे महर्षीनभिगम्य मम तत्वोपदेशेनानुग्रहः कर्तव्य इति भक्ति श्रद्धा विनयादि पुरस्सरं प्रार्थनां कृत्वा पारिपृष्टानां प्रश्नानां, तदा तदा मौनिना महर्षिणा द्राविड भाषायां लिखित्वा दत्तमुत्तरमिदं प्रश्नोत्तराकारं केरळादि नाना देश भाषानूदितमपीदानीं गीर्वाणवाण्या मनूद्यमानं विजयतेतमां ॥

॥ शुभं ॥

**om namo bhagavate śrīmate ramaṇāya**

# koham?

sarveshāmapi jīvānām duḥkhānushaṅgam vinā”tyantika sukhitvakāmanāyāssatvena, sarveshām svasminparamapremṇo vidyamānatvenacha, premṇaścha sukhanidānatvena, manovihīnāyām nidrāyām dine dine svayam anubhūyamānam sva svābhāvikam tatsukhamupalabdhum svena svasya jnānamā vaśyakam | tasya "koham"iti vichāra eva mukhyam sādhanam |

**praśnah 1. koham?**

uttaram ||. saptadhātubhirnishpanno’yam sthūladeho nāham | sabdasparśa rūpa rasa gandhākhyān pancha vishyān pṛthakpṛthag vijānanti śrotra tvaṅgnetra jihvā ghrāṇākhyāni jnānendriyāṇi panchāpi nāham | vachana gamanādānavisargā nandākhya panchakṛtya karāṇi vākpādapāṇi pāyūpastharūpāṇi pancha karmendriyāṇi cha nāham | śvāsādi panchakāryakarāṇi prāṇādayaḥ pancha vāyavo’pināham | sankalpātmakam mano’pi nāham | sarvavishaya sarvakārya śūnyam, sarva vishayavāsanāmātra vāsitamajnānamapi nāham |

# कोहं ?

सर्वेषामपि जीवानां दुःखानुषंगं विनाऽऽत्यन्तिक सुखित्वकामनाया स्सत्वेन, सर्वेषां स्वस्मिन्परमप्रेम्णो विद्यमानत्वेनच, प्रेम्णश्च सुखनिदानत्वेन, मनोविहीनायां निद्रायां दिने दिने स्वयमनुभूयमानं स्वस्वाभाविकं तत्सुखमुपलब्धुं स्वेन स्वस्य ज्ञानमावश्यकम्। तस्य 'कोहं' मिति विचार एव मुख्यं साधनम्।

प्रश्नः-१॥ कोहं ?

उत्तरम्॥ सप्तधातुभिर्निष्पन्नोऽयं स्थूलदेहो नाहं। शब्दस्पर्शरूपरसगन्धाख्यान्पञ्चविषयान्पृथक्पृथग्विजानन्ति श्रोत्रत्वक् जिह्वाघ्राणाख्यानि ज्ञानेन्द्रियाणि पञ्चापि नाहं। वचनगमनादानविसर्गानन्दाख्य पञ्चकृत्यकराणि वाक्पादपाणिपायूपस्थरूपाणि पञ्च कर्मेन्द्रियाणिच नाहं। श्वासादि पञ्चकार्यकराणि प्राणादयः पञ्चवायवोऽपि नाहं। सङ्कल्पात्मकं मनोऽपि नाहं। सर्वविषय सर्वकार्यशून्यं, सर्वविषयवासनामात्र सित मज्ञानमपि नाहं।

**pra-2|| etatsarvam nāhamiti chettarhi koham?**

**u :** evametatsarvam nāhamiti neti kṛtvā'vaśishṭa jnaptirevāham |

**pra-3 : jnaptessvarūpam kim?**

**u :** jnaptessvarūpam sachchidānandam |

**pra-4 : svarūpa darśanam kadānulabhyeta ?**

**u :** drśye jagati nivārite dṛgsvarūpa darśanam jāyeta |

**pra-5 : drśye jagati (pratibhāsamāne) sati svarūpa darśanam na jāyeta kinnu?**

**u :** na jāyeta |

**pra-6 : kutah?**

**u :** dṛk drśyam cha rajjuvatsarpavachcha bhavati | kalpita sarpajnāna vināśābhāve tadadhishṭhāna rajjujnānam yathā nodeti, tathā kalpita jagaddṛshṭi vināśābhāve tadadhishṭhāna svarūpadarśanam na jāyeta |

**pra-7 : dṛśyam jagatkadā vinashṭam syāt ?**

**u :** sarva vijnānānām, sarvakāryāṇām cha sādhāraṇa kāraṇe manasi līne jagallīnam syāt |

प्र-२ ॥ एतत्सर्वं नाहमिति चेत्तर्हि कोऽहं?

उ ॥ एवमेतत्सर्वं नाहमिति नेति कृत्वाऽवशिष्ट ज्ञप्तिरेवाहं.

प्र-३ ॥ ज्ञप्ते स्स्वरूपं किं?

उ ॥ ज्ञप्ते स्स्वरूपं सच्चिदानन्दं.

प्र-४ ॥ स्वरूप दर्शनं कदानुलभ्येत?

उ ॥ दृश्ये जगति निवारिते दृग्स्वरूप दर्शनं जायेत.

प्र-५ ॥ दृश्ये जगति (प्रतिभासमाने) सति स्वरूपदर्शनं न जायेत किन्नु?

उ ॥ न जायेत.

प्र-६ ॥ कुतः?

उ ॥ दृक्, दृश्यंच रज्जुवत्सर्पवच्च भवति। कल्पित सर्प ज्ञान विनाशाभावे तदधिष्ठान रज्जुज्ञानं यथा नोदेति, तथा कल्पित जगद्दृष्टि विनाशाभावे तदधिष्ठान स्वरूपदर्शनं न जायेत.

प्र-७ ॥ दृश्यं जगत्कदा विनष्टं स्यात्?

उ ॥ सर्व विज्ञानानां, सर्वकार्याणांच साधारण कारणे मनसि लीने जगल्लीनं स्यात्.

**pra-8 : manasassvarūpam kim tarhi?**

**u :** ātmasvarūpa nishṭhā kāchanātiśayita śaktireva mana ityetannāma | tadeva sakalasmaraṇānyapi janayati | sarvāṇyapi smaraṇāni nishidhya nirodhe kṛte na pṛthaṁmanasassvarūpam kinchidupalabhyate | tatascha smaraṇameva manasassvarūpam | smaraṇāni vihāya nānyatkinchijjagattattvamasti | nidrāyām smaraṇam nāsti, jagadapi nāsti | jāgratsvapnayossmaraṇāni santi, jagadapyāste| yathorṇanābhissvasmāttantūnbahirudbhāvya svasminneva punarapi samākarshayati, tathā manopi svasmājjagadudbhāvya svasminneva punarapi vilāpayati | manassvātmano yadā bahirmukham bhavati, tadā jagadbhāyāt | tato bhāti cha jagati na svarūpam bhāyāt | svarūpe bhāti sati na jagadbhāyāt | manasassvarūpe krameṇa vichāryamāṇe manaḥ svam bhavati | svamātmasvarūpameva | manaścha sthūlam kinchitsatatam avalambyaivam tishṭhet | nānavalambya pṛthaktishṭhet | mana eva sūkshma śarīramiti, jīva iti cha vyavahriyate |

**pra-9 : manasassvarūpam vichārya vijnātum ko vā mārgaḥ ?**

८. मनसस्स्वरूपं किं तर्हि?

आत्मस्वरूपनिष्ठा काचनातिशयित शक्तिरेव मन इत्येतन्नाम। तदेव सकलस्मरणान्यपि जनयति। सर्वाण्यपि स्मरणानि निषिध्य निरोधीकृते न पृथङ्मनसस्स्वरूपं किञ्चिदुपलभ्यते। ततश्च स्मरणमेव मनसस्स्वरूपं। स्मरणानि विहाय नान्यत्किंचिज्जगत्तत्त्वमस्ति। निद्रायां स्मरणं नास्ति, जगदपि नास्ति। जाग्रत्स्वप्नयोस्स्मरणानि सन्ति, जगदप्यास्ते। यथोर्णनाभिः स्वस्मात्तन्तून्बहिरुद्गाय्य स्वस्मिन्नेव पुनरपि समाकर्षयति, तथा मनोपि स्वस्माज्जगदुद्गाय्य स्वस्मिन्नेव पुनरपि विलापयति। मनस्स्वात्मनो यदा बहिर्मुखं भवति, तदा जगद्भायात्। ततो भाति च जगति न स्वरूपं भायात्। स्वरूपे भाति सति न जगद्भायात्। मनसस्स्वरूपे क्रमेण विचार्यमाणे, मनः स्वं भवति। स्वमात्मस्वरूपमेव। मनश्च स्थूलं किञ्चित्सततमवलंब्यैव तिष्ठेत्। नानवलंब्य पृथक्तिष्ठेत्। मन एव सूक्ष्मशरीरमिति, जीव इति च व्यवह्रियते।

९. मनसस्स्वरूपं विचार्य विज्ञातुं को वा मार्गः?

**u :** dehe’sminn "aham"iti yaduttishṭhati, tadeva manaḥ । ahamitismṛtiśca dehesmin kva nu vibhāsata iti vimārgite "hṛdaya" iti pratyavabhāseta । tadeva manaso janmasthānam । "aham" "aham" ityāvṛtti mātṛekṛtepi tatraivā (hṛdaya eva)-ntataḥ prāptissyāt । manasi jāyamānānām sarveshāmapi saṅkalapānām ahamiti saṅkalpa eva prathamassaṅkalpaḥ। prathamam manassaṅkalpe jāta evānye saṅkalpāssamujjṛmbhante । uttama purusho (ahami)-dbhavānantaram hi prathama madhyamau vijnāyete । uttama purusham vinā prathama madhyamau naiva bhavataḥ।

**pra-10 : manaḥ katham vilīyeta?**

**u :** "koham"iti nirantara vichāraṇenaiva mano vilīyeta । aham ka iti smṛtiḥ svetara sakala smṛtīḥ pravilāpya śavadāhaka daṇḍavat svayamapyantato vilīyate । tataśca svarūpadarśanam bhavet ।

**pra-11 : "koham"iti vichāram sarvadāvalambitumupāyaḥ kaḥ?**

**u :** bāhya saṅkalpeshu jāteshu, tānparipūrayitumaprayatamāna eva "ete saṅkalpāḥ kasyoditā" iti vichāram kuryāt । jāyantām nāma kiyantovā saṅkalpāḥ। ekaikasminsaṅkalpe samudbhūte,

देहेऽस्मि 'न्नहमिति' यदुत्तिष्ठति, तदेव मनः। अहमिति ~~स्मृति~~ स्मृतिश्च देहेऽस्मिन्ननु विभासत इति विमार्गिते "हृदय" इति प्रत्यवभासेत। तदेव मनसो जन्मस्थानं। "अहं", "अहं" इत्यावृत्ति मात्रे कृतेपि तत्रैवा (हृदय एव) न्ततः प्राप्तिस्स्यात्। मनसि जायमानानां सर्वेषामपि सङ्कल्पानां अहमिति सङ्कल्प एव प्रथमस्सङ्कल्पः। प्रथमं मनस्सङ्कल्पे जात एवान्ये सङ्कल्पास्समुज्जृंभन्ते। उत्तम पुरुषो (अहमि) द्भवानन्तरं हि प्रथम मध्यमौ विज्ञायेते। उत्तम पुरुषं विना प्रथम मध्यमौ नैव भवतः।

१०. मनः कथं विलीयेत?

"कोहमिति" निरन्तर विचारणेनैव मनो विलीयेत। अहं क इति स्मृतिः स्वेतर सकल स्मृतीः प्रविलाप्य शवदाहक दण्डवत्स्वयमप्यन्ततो विलीयते। ततश्च स्वरूपदर्शनं भवेत्।

११. "कोहमिति" विचारं सर्वदावलंबितुमुपायः कः?

बाह्य सङ्कल्पेषु जातेषु, तान्परिपूरयितुमप्रयतमान एव "एते सङ्कल्पाः कस्योदिता" इति विचारं कुर्यात्। जायन्तां नाम कियन्तो वा सङ्कल्पाः। एकैकस्मिन्सङ्कल्पे समुद्भूते,

tatkāla eva "kasyāyamudbhūta" iti sāvadhānam yadi vichāryate, tadā, "mameti" pratibhāseta | "aham ka" iti vichārite cha manassvajanmasthānam pratyāvarteta | anavaratamevama-bhyāse kṛte, tatpāṭavena manasassvajanmasthāna eva chirakālāvasthiti śaktirabhivardheta | sūkshmamidam mano buddhīndriya dvārā bahirmukhī bhavati chet, sthūlānīmāni nāma rūpāṇi jānāti | hṛdaya eva pratyavatishṭhate yadi, tadā nāma rūpāṇi na jānāti | bahirmukha vishaya pravṛttermanaḥ pratyāvṛtya hṛdayāvasthāpanameva "ahammukham" iti "antarmukham" iti cha gīyate | hṛdayādbahiḥ pravṛttireva "bahirmukham" ityuchyate | evam manasi hṛdaya pratishṭhite sati sakala saṅkalpa-vikalpa kāraṇam aham vilīnam satsārvadika svasvarūpamātram prakāśeta | sarvamapi kāryam ahaṅkāram parityajya kuryāt | tathā kṛte sarvamapi śivasvarūpam bhāseta |

**pra-12 : mano nigrahārthamanya upāyāḥ kim na santi?**

**u :** mano nirodhe vichāram vinā nānye samuchitāssantyupāyāḥ | upāyāntarāvalambanena manonigrahāya pravṛttau, manonigṛhītamiva bhūtvā punarapi bahirudbhavet | prāṇāyāmenāpi

तत्कालएव "कस्यायमुद्भूत" इति सावधानं यदि विचार्येत, तदा "ममेति" प्रतिभासेत। "अहंक" इति विचारितेच मनस्स्व जन्मस्थानं प्रत्यावर्तेत। अनवरत मेवमभ्यासे कृते, तत्पाटवेन मनसः स्वजन्मस्थान एव चिरकालावस्थिति शक्ति रभिवर्द्धेत। सूक्ष्ममिदं मनो बुद्धीन्द्रिय द्वारा बहिर्मुखी भवतिचेत्, स्थूलानीमानि नामरूपाणि जानाति। हृदय एव प्रत्यवतिष्ठते यदि, तदा नामरूपाणि न जानाति। बहिर्मुख विषय प्रवृत्ते मनः प्रत्यावृत्य हृदयावस्थापन मेव "अहंमुख" मिति "अन्तर्मुख" मिति चागीयते। हृदयाद्बहिः प्रवृत्तिरेव "बहिर्मुख" मित्युच्यते। एवं मनसि हृदय प्रतिष्ठिते सति सकल सङ्कल्पविकल्प कारण महं विलीनं सत्सार्वदिक स्वस्वरूप मात्रं प्रकाशेत। सर्वत्रापि कार्ये नहङ्कारं परित्यज्य कुर्यात्। तथाकृते सर्वेऽपि शिवस्वरूपं भासेत।

१२. मनो निग्रहार्थ मन्य उपायाः किं न सन्ति?

मनो निरोधे विचारं विना नान्ये समुचिताः सदुपायाः। उपायान्तराश्रयणेन मनो निग्रहार्थ प्रवृत्तौ, मनो निगृहीत मिव भूत्वा पुनरपि बहिरुद्भवेत्। प्राणायामेनापि

mano niruddham bhavati | kintu prāṇarodho yāvat kālam bhavati tāvatkālaparyantam mano niruddhamiva bhūtvā, prāṇe (nirodhāvasthām vihāya) bahiḥ pravṛtte svayamapi bahirmukhī bhūya vāsanāvaśānmanopi tatastato dhāvet | manasaḥ prāṇasyacha janmasthānamekameva | manasassaṅkalpanameva svarūpam | "aham"iti saṅkalpanameva manasaḥ prathamasaṅkalpaḥ | tadevāhaṇkāro nāma | ahaṇkārascha yato nishpadyate, tata eva prāṇopi nishpadyate | tatascha manasi nigṛhīte prāṇaḥ prāṇe pragṛhīte manascha vilīyate | parantu sushuptau manasi pralīnepi prāṇo na pralīyate | deha samrakshaṇa nimittam "mṛtorvāyam deha" iti madhyastha śaṅkāvyavachchhedanārtham chaivam prāṇa jāgaraṇamīśvara niyati siddham vijayate | jāgrati, samādhau cha vilīnāvasthe manasi, prāṇopi vilīyate | manasassthūlarūpameva prāṇa iti bhavati | āprāyaṇāchchharīre prāṇamavasthāpya prāyaṇa samaye mana eva prāṇamākṛshya gachchhati | tasmāt prāṇaspandanirodho manolayopāyo bhavannapi na tannāśopāyo bhavati | prāṇāyāma iva mūrtidhyāna mantra japāhāraniyamādyāscha mano nirodhe sāhāyyamātram kurvanti | mūrti dhyānena, mantra japena cha mana ekāgratāmaśnute |

manaścha

मनो निरुद्धं भवति। किन्तु प्राण रोधो यावत्कालं भवति तावत्काल पर्यन्तं मनो निरुद्धमिव भूत्वा, प्राणे (निरोधावस्थां विहाय) बहिः प्रवृत्ते स्वयमपि बहिर्मुखी भूय वासना वशान्मनोपि ततस्ततो धावेत्। मनसः प्राणस्यच जन्म स्थान मेकमेव। मनस स्सङ्कल्पन मेव स्वरूपं। "अहं"मिति सङ्कल्पन मेव मनसः प्रथम सङ्कल्पः। तदेवाहङ्कारो नाम। अहङ्कारश्च यतो निष्पद्यते, तत एव प्राणोपि निष्पद्यते। ततश्च मनसि निगृहीते प्राणः, प्राणे प्रगृहीते मनश्च विलीयते। परन्तु सुषुप्तौ मनसि प्रलीनेपि प्राणो न प्रलीयते। देह संरक्षण निमित्तं "मृतोवायंदेह" इति मध्यस्थ शङ्कान्यवच्छेदनार्थंचैवं प्राण जागरण मीश्वर नियति सिद्धं विजयते। जाग्रति, समाधौच विलीनावस्थे मनसि, प्राणोपि विलीयते। मनस स्थूल रूप मेव प्राण इति भवति। आ प्रायण कालं च्छरीरे प्राण मवस्थाप्य प्रायण समये मन एव प्राण माकृष्य गच्छति। तस्मात्प्राण स्पन्द निरोधो मनोलयोपायो भवन्नपि न तन्नाशोपायो भवति। प्राणायाम इव मूर्ति ध्यान मन्त्रजपाहार नियमाद्याश्च मनो निरोधे साहाय्य मात्रं कुर्वन्ति। मूर्ति ध्यानेन, मन्त्रजपेनच मन एकाग्रता मश्नुते। मनश्च

sadā chanchala svabhāvameva vartate | vetaṇdasya śuṇdā daṇde samarpitāyām śṛṇkhalāyām sa cha yathā tāmevānyadvastu vihāyāvalambamāno gachchati, tathā manopi kinchinnāmarūpam chirābhyāsagocharitamevāvalambeta | anavadhikāsankhyeya saṅkalpa vikalpādi vṛtti bhedairmanaso vikāsa prāptau ekaikasyāssaṅkalpavyakter daurbalyam, naishphalyam cha bhavati | saṅkalpeshu krameṇopaśamam prāpiteshvekāgratā siddhidvārā prābalyam prāptasya manasassvātmavichāra siddhiratisulabhā bhavati | sakala niyama śreshṭhena hitamita medhyāśana niyamenodbhūta satvaguṇa bhūyisṭham mana evātma vichārāntaraṅga sādhanam bhavatīti sopi sāhāyyamaśnute |

**pra-13 : vishaya vāsanā janitāssaṅkalpāḥ samudrochchalattuṅga taraṅga bhaṅgā iva santatam hi sambhavanti! te cha katham vā kadā vā praśamam prāpnuyuḥ?**

**u :** paṭutama svasvarūpa dhyāne krameṇodite te sarve vinaśyeyuḥ |

**pra-14 : anādi kālāgatākhila vishaya vāsanāssvasmin pravilā pya kevala svarūpa mātratayāvasthānam sambhavativā?**

**u :** svarūpa mātrāvasthitissambhavati vā na veti sandehātmaka saṇkalpasyāpyavakāśamapradāya svarūpānusandhānameva sudhṛḍhatayā haṭhādavalambanīyam | api chetsudurāchārarataḥ

pāpī kaśchit

सदा चञ्चल स्वभावमेव वर्तते । वेतण्डस्य शुण्डा दण्डे समर्पितायां शृङ्खलायां सच यथा तामेवान्यत्तु विहायावलंबमानोगच्छति, तथा मनोपि किञ्चिन्नाम रूपं चिराभ्यास गोचरितमेवावलंबेत । अनवधिकासंख्येय सङ्कल्प विकल्पादि वृत्तिभेदैर्मनसो विकास प्राप्तौ एकैकस्यास्सङ्कल्प व्यक्ते दौर्बल्यं, नैष्फल्यंच भवति । सङ्कल्पेषु क्रमेणोपशमं प्रापितेष्वेकाग्रता सिद्धि द्वारा प्राबल्य प्राप्तस्य मनस स्स्वात्म विचार सिद्धिरति सुलभा भवति । सकल नियम श्रेष्ठेन हितमित मेध्याशन नियमेनोद्भूत सत्वगुण भूयिष्ठं मन एवात्म विचारान्तरंगसाधनं भवतीति सोपि साहाय्य मश्नुते ।

१३. विषय वासना जनिता स्सङ्कल्पाः समुद्रोच्छलत्तुंग तरंगभंगाइव सन्ततंहि संभवन्ति ! तेच कथंवा कदावा प्रशमं प्राप्नुयुः?

पटुतम स्वस्वरूपध्याने क्रमेणोदिते ते सर्वे विनश्येयुः ।

१४. अनादि कालागताखिल विषय वासनास्स्वस्मिन्प्रविलाप्य केवल स्वरूप मात्र तयावस्थानं संभवतिवा ?

स्वरूप मात्रावस्थिति स्संभवतिवा नवेति सन्देहात्मक सङ्कल्पस्याप्यवकाश मप्रदाय स्वरूपानुसन्धानमेव सुदृढतया हठादवलंबनीयं । अपिचेत्तु दुराचाररतः पापीकश्चि

sopi "aham pāpakārī jātaḥ katham vā mokshatīram prāpnuyām" iti santāpachintām samūlamunmūlya svarūpa dhyāna tatparo bhavati chennūnam kṛtakṛtyo mukto bhavati | śobhanam manaḥ aśobhonam mana iti na manassvarūpato dvividam vartate | ekameva manaḥ | kintu vāsanā eva śubhā aśubhā iti dvividhā bhavanti | yadi śubha vāsanānvaya vaśagam mano bhavati tadā śubhamiti aśubha vāsanānvaya vaśagam yadā tadā tadaśubhamiti vyavahriyate | prapancha vishayeshu anyakāryeshu cha na manaḥ prachodayāt | anyeshām dussvabhāvavatvepi teshu dvesho na kāryaḥ | rāga dveshāvubhāvapi heyau staḥ | parasya kriyamā-ṇassarvopyupakārassvasyaiva kriyamāṇo bhavati | etattatvam jnāyate yadi, kovānyasmai nopakartum prayateta | ahamyudbhūte sarvamapyudbhavati | ahamyupaśānte sarvamapyupaśāmyati | yāvadyāvad vinayena sancharāmasstā-vattāvat sādhu bhavati | mana upaśāntiśchedāpyate yatra kutra vā nivāso na viruddho bhavati |

**pra-15 : vichāraṇā kiyadavadhi kartavyā ?**

**u :** manasi yāvadavadhi vishayavāsanā vasanti, tāvatkāla paryantam "koham" iti vichāraṇānusartavyā | yadā yadā vishayavāsanāḥ prasphuranti, tadā tadā tadutpattisthāna eva vichāreṇa

त्सोपि "अहं पापकारी जातः, कथं वा मोक्षतीरं प्राप्नुया" मिति संतापचिन्तां समूलमुन्मूल्य स्वरूपध्यानतत्परो भवति चेन्नूनं कृतकृत्यो मुक्तो भवति। शोभनं मनः, अशोभनं मन इति न मनस्स्वरूपतो द्विविधं वर्तते। एकमेव मनः। किन्तु वासना एव शुभा अशुभा इति द्विविधा भवन्ति। यदि शुभवासनान्वयवशगं मनो भवति तदा शुभमिति अशुभवासनान्वयवशगं यदा तदा तदशुभमिति व्यवह्रियते। प्रपञ्चविषयेषु, अन्यकार्येषु च न मनः प्रचोदयात्। अन्येषां दुस्स्वभाववत्वेऽपि तेषु द्वेषो न कार्यः। राग द्वेषावुभावपि हेयौ स्तः। परस्य क्रियमाणस्सर्वोऽप्युपकार स्स्वस्यैव क्रियमाणो भवति। एतत्तत्वं ज्ञायते यदि, को वान्यस्मै नोपकर्तुं प्रयतेत। अहम्युद्भूते सर्वमप्युद्भवति। अहम्युपशान्ते सर्वमप्युपशाम्यति। यावद्यावद्विनयेन सञ्चराम स्तावत्तावत्साधु भवति। मन उपशान्तिश्चेदाप्यते यत्र कुत्र वा निवासो न विरुद्धो भवति।

१५. विचारणा कियदवधि कर्तव्या?

मनसि यावदवधि विषयवासना वसन्ति, तावत्कालपर्यन्तं "कोऽहं" मिति विचारणानुसर्तव्या। यदा यदा विषयवासनाः प्रस्फुरन्ति तदा तदा तदुत्पत्तिस्थान एव विचारेण

vināśam tāḥ prāpaṇīyāḥ | yāvat svarūpamupalabhyate tāvannirantaram svarūpa smaraṇameva kartavyam | tadevālam | prākāra pravishṭāśśatravo yāvadantarvasanti, tāvattato bahirāgachchhanti; bahirāgatāścha te yadi chhidyante, tadā sālassvavaśo bhavitumarhati |

**pra-16 : svarūpasya kassvabhāvaḥ ?**

**u :** ātma-svarūpa eka eva yathārtha bhūtaḥ | jagajjīveśvarā-śśuktāviva rajatam tatra kalpitāḥ | jagajjīveśvara trayam etadekasminnevakāla udbhūya, ekasminneva samaye tirobhavati | ahamiti dhīḥ kinchidapi yatra nāsti, tadeva sthānam svarūpamuchyate | tadeva "maunam" iti chābhidhīyate | svarūpameva jagat | svarūpamevāham | svarūpameveśvaraḥ | sarvam khalvidam śiva svarūpameva |

**pra-17 : Sarvamidamīśādhīnam nanu?**

**u :** ichchā saṅkalpa prayatnamantarā samayāddyushite savitari tatsannidhi matreṇāyaskānta syānalodvamanam tāmarasa kusumasya vikāsaḥ salilānām samśoshanam laukikānām sarveshāmapi janānām sva sva kāryeshu pravṛttiḥ kāntopala sannidhau sūchikā cheshtā cha yathā bhavati, tathā īśasya sannidhiviśeshamātreṇa pravṛttasya sṛshṭyādi kṛtyatrayasya vā, pancha kṛtyasya vā jīvāḥ paravaśībhūya

विनाशं ताः प्रापणीयाः। यावत्स्वरूपमुपलभ्यते तावन्निरन्तरं स्व रूपस्मरणमेव कर्तव्यं। तदेवालं। प्राकार प्रविष्टाश्शत्रवो याव दन्तर्वसन्ति तावत्ततो बहिरागच्छन्ति; बहिरागताश्चेते यदि छिद्यन्ते, तदा सालस्स्ववशो भवितुमर्हति।

१६. स्वरूपस्य कस्स्वभावः?

आत्मस्वरूप एकएव यथार्थभूतः। जगज्जीवेश्वराश्शु क्ताविव रजतं तत्रकल्पिताः। जगज्जीवेश्वरत्रयमेतदेकस्मि न्नेवकाल उद्भूय, एकस्मिन्नेव समये तिरोभवति। अहमिति धीःकिञ्चिदपि यत्र नास्ति, तदेव स्थानं स्वरूपमुच्यते। तदेव "मौन" मितिचाभिधीयते। स्वरूपमेव जगत्। स्वरूपमेवाहं। स्वरूपमेवेश्वरः। सर्वं खल्विदं शिवस्वरूपमेव।

१७. सर्वमिद मीशाधीनं ननु?

इच्छा सङ्कल्प प्रयत्न मन्तरा समयाच्छ्युपिते सवितरि तत्सान्निधि मात्रेणायस्कान्तस्यानलोद्वमनं, तामरसकुसुमस्य विकासः, सलिलानां संशोषणं, लौकिकानां सर्वेषामपि जना नां स्वस्व कार्येषु प्रवृत्तिः, कान्तोपलसन्निधौ सूचिकाचेष्टाच यथाभवति, तथा ईशस्य सन्निधि विशेषमात्रेण प्रवृत्तस्य सृ ष्ट्यादि कृत्यत्रयस्यवा, पञ्चकृत्यस्यवा जीवाः परवशीभूयस्व

svasvakarmānusāreṇa cheshṭitvā vinivartante | kintu sa īśvarassaṅkalpa sahito na bhavati | na cha tāni sṛshṭyādi karmā ṇi tam limpanti | yathā sūryam lokakṛtāni karmāṇi na limpanti, yathā vā chaturbhūtaguṇā ākāśam na samavayante, tā dṛgevaitat |

**pra-18 : bhakteshu kovā bhakto viśishyate ?**

**u :** yaḥ khalu svātmānameva bhagavati sve mahimni svarūpe samarpayati, sa eva viśishṭo bhaktimatsu | ātmachintātiriktānātmachintāyāḥ kinchidapyantaramapradāyā-tma nishṭhātatparataiva bhagavati svātmasamarpaṇam nāma | bhagavati samarpitam sarvamapi bharanyāsam sa cha samvahati | pārameśvarī kāchanaśaktiḥ kāryajātam sarvam nirvahati | tatra bharanyāsa purassaram tadadhīnatāsthitim vihāya "evam kartavyam, manevam kartavyam" ityevam nassantatachintayā kim? dhūmaśakaṭe sakala bhāravāhini jnāte sati tadāruhya gachchadbhirasmābhissvakīyamalpamapi mūtam tatraiva prakṣhipya sukhenāvasthātum aśaknuvadbhistanmūta tatrāpi svaśirasi samudūhya kimartham duḥkhamanubhoktavyam?

**pra-19 : vairāgyam nāma kim?**

**u :** sarveshāmapi saṅkalpānāmutpattisthāna evā”tyantika

स्वकर्मानुसारेण चेष्टित्वा विनिवर्तन्ते। किन्तु स ईश्वर स्सङ्कल्प सहितो न भवति। नच तानि सृष्ट्यादि कर्माणि तं लिंपन्ति। यथा सूर्यं लोककृतानि कर्माणि न लिंपन्ति, यथा वा चतुर्भूतगुणा आकाशं न समवयन्ते, तादृगेवैतत्।

१८. भक्तेषु को वा भक्तो विशिष्यते?

यः खलु स्वात्मानमेव भगवति स्वे महिम्नि स्वरूपे समर्पयति, स एव विशिष्टो भक्तिमत्सु। आत्मचिन्तातिरिक्ता नात्मचिन्तायाः किञ्चिदप्यन्तरमप्रदायात्मनिष्ठातत्परतैव भगवति स्वात्मसमर्पणं नाम। भगवति समर्पितं सर्वमपि भरन्यासं स च संवहति। पारमेश्वरी काचन शक्तिः कार्यजातं सर्वं निर्वहति। तत्र भरन्यास पुरस्सरं तदधीनतास्थितिं विहाय "एवं कर्तव्यं, मनेवं कर्तव्यं" इत्येवं नस्सन्ततचिन्तया किं? धूमशकटे सकल भारवाहिनि ज्ञाते सति तदारुह्य गच्छद्भिरस्माभि स्स्वकीय मल्पमपि मूतं तत्रैव प्रक्षिप्य सुखेनावस्थातु मशक्नुवद्भि स्तन्मूत तत्रापि स्वशिरसि समुद्वह्य किमर्थं दुःख मनुभोक्तव्यं?।

१९. वैराग्यं नाम किं?

सर्वेषामपि सङ्कल्पाना मुत्पत्तिस्थान एवाऽऽत्म

vināśa sampādanameva vairāgyam bhavati | jaladhijaṭharagatam muktāphalam gṛhītum, kaṭitaṭe kimapi śilā khaṇḍam samābaddhya, jaladhi jaṭharamanupraviśya, yathā loke tadupalabhyate, tathā mumukshavopi vairāgyādi sādhana sampattyā svayameva svāntaranupraviśya svātma muktā phalamupalabheran |

**pra-20 : īśvareṇa guruṇācha jīvā mochayitum śakyante vā?**

**u :** īśvaro guruścha mokshopayoga mārgapradarśakāveva | na khalu svayameva jīvanmoksham prāpayataḥ | īśvaro guruścha na parasparam vastuto bhinnau | vyāghra mukhapatitam prāṇi jātam yathā nirjīvam bhavati tathā"chār-yā nugraha dṛshṭi nipatitassarvopi prāṇī, nirjīvā mṛtībhāva sampā danena samrakshyata eva, na sajīvam parityakshyate | sarvopi jīvassvena paurusheṇa prayatnena sarveśvareṇa guruṇā vā sandarśite samyagdarśanamār ge sāvadhānatayā pravṛttim sampādya muktim prāptumarhati | svenajnāna chakshushā svamātmānam svenaiva jnātum śakyate | katham khalu pareṇa jnātum śakyate | na hi rāmassvamātmānam rāma iti jnātum ādarśam anyam apekshate |

**pra-21 : mukti kāmasya pumsaḥ (prapancha) tatva vichā-ropyāvaśyako v ā ?**

न्तिक विनाश संपादनमेव वैराग्यं भवति। जलधि जठरगतं मुक्तापलं गृहीतुं, कटितटे किमपि शिलाखण्डं समाबद्ध्य, जलधि जठर मनुप्रविश्य, यथा लोके तदुपलभ्यते, तथा मुमुक्षवोपि वैराग्यादि साधन संपत्त्या स्वयमेव स्वान्तरनुप्रविश्य स्वात्म मुक्ताफल मुपलभेरन्।

२०. ईश्वरेण गुरुणाच जीवा मोचयितुं शक्यन्ते वा?

ईश्वरो गुरुश्च मोक्षोपयोग मार्ग प्रदर्शकावेव। न खलु स्वयमेव जीवान्मोक्षं प्रापयतः। ईश्वरो गुरुश्च न परस्परं वस्तुतो भिन्नौ। व्याघ्र मुख पतितं प्राणिजातं यथा निर्जीवं भवति, तथाऽऽचार्यानुग्रह दृष्टि निपतित स्सर्वोपि प्राणी, निर्जीवा मृत्तीभाव संपादनेन संरक्ष्यत एव, न स जीवं परित्यक्ष्यते। सर्वोपि जीवः स्वेन पौरुषेण प्रयत्नेन सर्वेश्वरेण गुरुणावा संदर्शिते सम्यग्दर्शन मार्गे सावधानतया प्रवृत्तिं संपाद्य मुक्तिं प्राप्नुमर्हति। स्वेन ज्ञानचक्षुषा स्वमात्मानं स्वेनैव ज्ञातुं शक्यते। कथं खलु परेण ज्ञातुं शक्यते। न हि राम स्स्वमात्मानं राम इति ज्ञातु मादर्श मन्य मपेक्षते।

२१. मुक्तिकामस्य पुंसः (प्रपञ्च) तत्व विचारो प्यावश्यको वा?

**u :** yathā dūrataḥ parityājyasyāvakara nikarasya viparighaṭṭanena na kimapi prayojanam dṛśyate, tathā svātmānam vividishurapi pumān svātmasvarūpāvārakānīmāni tatvāni dūrato'parityajya, tāni kiyanti, teshām guṇāścha kīdṛśa iti teshām parigaṇanena vā vichāreṇa vā na kimapi phalamasti | ataścha prapañchassarvopi svapnasamāna svabhāva iti mumukshubhirnirṇetavyam |

**pra-22 : jāgrataḥ svapnasya cha parasparam bhedo na kim?**

**u :** jāgraddīrgha kālam, svapnaḥ kshaṇika iti dīrghatva kshaṇikatva bhedam vinā nānyo bhedosti | jāgrati jātā vyavahārā yathā satyāḥ prakāśante, tathaiva svapne'nubhūya-mā nāssarve vyavahārāścha tatkāle satyāssandṛśyante | kintu svapne jāgraddehabhinnam deham mano gṛhṇāti | jāgratsvapnayor dvayorapi vijnānāni, jneya nāma rūpāṇi cha yugapadāvirbhavanti |

**pra-23 : mumukshūṇām śāstrapaṭhanena kimapi prayojanamasti vā ?**

**u :** śastreshu muktiprāptaye manonigrahasyaivopāyatayopadeśena, "teshām mano nigrahopāya pradarśana eva paramam tātparyam" iti siddhānta tatve (guru mukhāt) avagate sati bahuśāstrābhyāsa pariśrameṇa na kinchidasti prayojanam |

sva manonigrahārtham

यथा दूरतः परित्याज्यस्यावकरनिकरस्य विपरिच्छेदनेन न किमपि प्रयोजनं दृश्यते, तथा स्वात्मानं विविदिषुरपि पुमान् स्वात्मस्वरूपावारकानीमानि तत्वानि दूरतोऽपरित्यज्य, तानि कियन्ति, तेषां गुणाश्च कीदृश इति तेषां परिगणनेनवा विचारेणवा न किमपि फलमस्ति। अतश्च प्रपञ्चस्सर्वोऽपि स्वप्नसमानस्वभाव इति मुमुक्षुभिर्निर्णेतव्यं।

२२. जाग्रतः, स्वप्नस्यच परस्परं भेदो न किं?

जाग्रद्दीर्घकालं, स्वप्नः क्षणिक इति दीर्घत्व क्षणिकत्व भेदं विना नान्यो भेदोऽस्ति। जाग्रति जाता व्यवहारा यथा सत्याः प्रकाशन्ते, तथैव स्वप्नेऽनुभूयमानास्सर्वे व्यवहाराश्च तत्काले सत्यास्संदृश्यन्ते। किन्तु स्वप्ने जाग्रद्देहाभिन्नं देहं मनो गृह्णाति। जाग्रत्स्वप्नयोर्द्वयोरपि विज्ञानानि, ज्ञेय नामरूपाणिच युगपदाविर्भवन्ति।

२३. मुमुक्षूणां शास्त्रपठनेन किमपि प्रयोजनमस्तिवा?

शास्त्रेषु मुक्तिप्राप्तये मनोनिग्रहस्यैवोपायतयोपदेशेन, "तेषां मनोनिग्रहोपाय प्रदर्शन एव परमं तात्पर्य" मिति सिद्धान्ततत्वे (गुरुमुखात्) अवगते सति बहुशास्त्राभ्यास परिश्रमेण नाकिञ्चिदस्ति प्रयोजनं। स्वमनोनिग्रहार्थं

svayameva svasmin svātmānam "koham" iti vichāram vihāya, katham bahuśāstra vichāreṇa mano-nigrahassulabho bhavati ? | svam svenajnānachakṣhushā svasmin svayameva hyavagantavyam | svam cha pañcha kośāntaravabhāsate | śāstra granthāścha pañchakośa bāhyasthā bhavanti | tasmāt pañcha kośānapi "neti netīti" nishidhyānveshṭavyassvātmāśā-streshvanveshaṇena katham jnātum śakyate | ataśśāstracharchā vṛthaiva | abhyastamakhilam śāstramapi kasminschit kālaviśeshe vismaraṇīyatāmiyādeva |

**pra-24 : kim sukham?**

**u :** ātmasvarūpameva sukham bhavati | sukhasyātmasvarū pasya cha bhedo nāsti | prapañcha vastushu kasminśchidapi nāsti sukhaleśopi | tebhyassukham bhavatīti vayam avivekād-avagachchhāmaḥ | mana ātmano bahirāgamana kāle duḥkhamanubhavati | asmanmanoratha paripūrti samayeshu sarveshvapyasmākam manassva yathāsthānam prāpyaivātma sukhamevānubhavati | evameva sushupti-samādhi-mūrchhāsu, ishṭa prāpti samaye, anishṭa-vastu-viyoga kshane cha mana antarmukham sadātmasukhamevānubhavati | evam manaḥ ātmanobahirātmani cha gamanāgamanekurvadaviśrāntam bhramati | taroradhastāchchāyā

स्वयमेव स्वस्मिन्स्वात्मानं "कोऽहम्"मिति विचारं विहाय, कथं वा दुराह्लनिवारेण मनोनिग्रहस्सुलभो भवति? । एवं स्वेनज्ञानेन च क्षुधा स्वस्मिन्स्वयमेवाह्यवगन्तव्यं । एवं च पञ्चकोशान्तरवभासते । शास्त्रं ग्रन्थाश्च पञ्चकोशबाह्यस्था भवन्ति । तस्मात्पञ्चकोशानपि "नेतिनेतीति" निषिध्यान्वेष्टव्यः स्वात्मा शास्त्रान्वेषणेन कथं ज्ञातुं शक्यते? । अतश्शास्त्रचर्चा वृथैव । अभ्यासमारब्धं शास्त्रमपि कस्मिंश्चित्कालविशेषे विस्मरणीयमपि यादेव ।

## २४. किं सुखं?

आत्मस्वरूपमेव सुखं भवति । सुखस्यात्मस्वरूपस्य च भेदो नास्ति । प्रपञ्चवस्तुषु कस्मिंश्चिदपि नास्ति सुखलेशोऽपि । तेभ्यस्सुखं भवतीति वयमविवेकादवगच्छामः । मन आत्मनो बहिरागमनकाले दुःखमनुभवति । अस्मन्मनोरथपरिपूर्तिसमयेषु सर्वेष्वप्यस्माकं मन स्वयथास्थानं प्राप्यात्मसुखमेवानुभवति । एवमेव सुषुप्तिसमाधिमूर्छासु, इष्टप्राप्तिसमये, अनिष्टवस्तुवियोगक्षणे च मन अन्तर्मुखं सदात्मसुखमेवानुभवति । एवं मनः आत्मनो बहिरागमनेच गमनागमनेकुर्वद विश्रान्तं भ्रमति । तरोरधस्ताच्छा

sukhakarī bhavati | tarorbahiḥ pradeśe bhānorūshmā duḥkhakaro bhavati | bahissanchārī pathikaḥ kaśchichchhāyāmāśritya śītalī bhavati | evam kshaṇam sthitvā punarapi bahirgatvā sūryoshmaṇā pariśrāntaḥ punarapi taruchchhāyām prāpya sukhamanubhavati | evam chhāyātaḥ bahirgachchhan, bāhyā chchhāyāmāgachchhan pathiko vartate | ayamevam kurvāṇa evā vivekīti gīyate | vivekītu chhāyām parityajya bahireva na gachchhet | evameva jnānino manopi brahma kadāchidapi na parityajati | ajnāninām manastu bāhya prapanche bhrāmam, bhrāmam duḥkhamanubhūya, kshaṇakālam brahma prāpya sukham chānubhavati | mana evajagat | jagati tirohite vismṛtim prāpite manassvānandamanubhavati | atirohite (bhāti) jagati mano duḥkhamanubhavati |

**pra-25 : jnānadṛshṭirityetat kim?**

**u :** tūshṇīm sthitereva "jnānadṛshṭi"-riti vyavahāraḥ | manasassvātmani pravilāpanameva tūshṇīm bhāvāvasthā | evam sthitireva jnānadṛshṭirityuchyate | anyābhiprāyābhijnatā, trikāla jnātṛtvam, dūradeśa padārthagrahaṇamityevamādayo na jnānadṛshṭi padavyapadeśyā bhavitumarhanti |

**pra-26 : nirāśāyājnānasya cha kassambandhaḥ ?**

या सुखकरी भवति। तरोर्बहिः प्रदेशे भानोरूष्मा दुःखकरो भवति। बहिस्सञ्चारी पथिकः कश्चिच्छायामाश्रित्य शीतली भवति। एवं क्षणं स्थित्वा पुनरपि बहिर्गत्वा सूर्योष्मणा परिश्रान्तः पुनरपि तरुच्छायां प्राप्य सुखमनुभवति। एवं छायातः बहिर्गच्छन्, बाह्याच्छायामागच्छन् पथिको वर्तते। अयमेवं कुर्वाण एवाविवेकीति गीयते। विवेकीतु छायां परित्यज्य बहिरेव न गच्छेत्। एवमेव ज्ञानिनो मनोपि ब्रह्म कदाचिदपिन परित्यजति। अज्ञानिनां मनस्तु बाह्यप्रपञ्चे भ्रामं भ्रामं दुःखमनुभूय, क्षणकालं ब्रह्म प्राप्य सुखंचानुभवति। मन एव जगत्। जगति तिरोहिते विस्मृतिं प्रापिते मन स्वानन्दमनुभवति। अतिरोहिते (भाति) जगति मनो दुःखमनुभवति।

२५. ज्ञानदृष्टि रित्येतत्किं?

तूष्णीं स्थितिरेव "ज्ञानदृष्टि" रिति व्यवहारः। मनस स्स्वात्मनि प्रविलापनमेव तूष्णींभावावस्था। एवं स्थितिरेवज्ञानदृष्टि रित्युच्यते। अन्याभिप्रायाभिज्ञता, त्रिकालज्ञातृत्वं, दूरदेश पदार्थग्रहण मित्येवमादयो नज्ञानदृष्टि पदव्यपदेश्या भवितु मर्हन्ति।

२६. निराशाया ज्ञानस्यच कस्संबन्धः?

**u :** nirāśaivajnānam । nirāśā'nyā, jnānam chānyaditi na bhavati । etadvayamapi vastuta ekameva । ātmanonyatra manaso' pravṛttireva nirāśeti niruchyate । ātmanonyasya kasyachidapratibhāsa eva jnānamiti vyapadiśyate । anyatrā' pravṛttirvairāgyamathavā nirāśā bhavati । svasvarūpāparityāga eva jnānam ।

**pra-27 : vichārasya dhyānasya cha ko bhedaḥ?**

**u :** svātmani manaso dhāraṇameva vichāraḥ । svātmanaḥ brahmeti, sachchidānandamiti cha nirantara bhāvanam dhyānam bhavati ।

**pra-28 : muktiḥ kā ?**

**u :** baddhaḥ aham ka iti vichāreṇa sva yathārtha svarūpam viditvā tannishṭhataiva muktiḥ ।।

---

**।। śubhamastu ।।**

**।। srī ramanārpaṇamastu ।।**

**vi. jagadīśvara śāstri**

8-10-41

निराशैवज्ञानं । निराशाऽन्या, ज्ञानंचान्य दितिनभवति। एतद्द्वयमपि वस्तुत एकमेव । आत्मनोऽन्यत्र मनसोऽप्रवृत्ति रेव निराशेति निरुच्यते । आत्मनोन्यस्य कस्यचि दप्रतिभा स एव ज्ञानमिति व्यपदिश्यते । अन्यत्राऽप्रवृत्ति वैराग्य मथवा निराशा भवति । स्वस्वरूपापरित्याग एवज्ञानं ।

२७. विचारस्य ध्यानस्यच को भेदः?

स्वात्मनि मनसो धारण मेव विचारः । स्वात्मनः ब्रह्मेति, सच्चिदानन्दमितिच निरन्तर भावनं ध्यानं भवति ।

२८. मुक्तिः का?

बद्धः, अहं क इति विचारेण स्वयथार्थस्वरूपं विदित्वा तन्निष्ठैव मुक्तिः ॥

---

॥ शुभमस्तु ॥

॥ श्री रमणार्पणमस्तु ॥

---

वि. जगदीश्वरशास्त्री ॥

८-१०-४१.